सर्वाङ्गमपि मदीयं करतलमभवत्सुधाब्धिमग्नमिव ॥ २ ॥

स्वामिन्विनैव नेत्रे दृष्टा वै विद्युतो धगद्धगिताः ।
रक्तातिरक्तपीतश्वेतत्विड्ताराकाः पुरो ह्युदिताः ॥ ३ ॥

कनकमयकुसुमवृष्ट्या गगनं सर्वत्र सङ्कीर्णम् ।
रुद्रग्रन्थिविभेदो जातः स्वाभाविकेन शीलेन ॥ ४ ॥

आषाढकृष्णपक्षे नन्दनसंवत्सरे तृतीयायाम् ।
स्वानन्दचन्द्रिकेयं लिखितादित्ये च **रामपुत्रेण** ॥ ५ ॥

श्रीपरमशिव शरणम् ॥'

The author calls himself the pupil of Ātmānanda. The work seems to be a learned disquisition

---

॥ अध्यारोपणम् ॥

7607. ADHYĀROPAṆAM.

Ms. Not noticed by Burnell No. 15570 b

Substance—Palm leaf. Size—16¾×1½ inches Leaves—59 (175-234). Lines—5 to a Page. Script—Telugu. No. of Granthas—590. Author—Vāsudevaśiṣya Incomplete. Not printed

Beginning:

वागीशाद्याः + गजाननम् ॥

बोधानन्दखनिं निरस्तसकलं कारुण्यपूर्णेक्षणं
मूढानामुपदेशकञ्च सततं पापात्मनां पापहम् ।
वैराग्यञ्च विरागिणं सुखकरं सम्पादनं सर्वदा
श्रीमद्देशिकवासुदेवयतिनं मूढात्मकोऽहं भजे ॥

यस्यात्मभूतस्य गुरोः प्रसादा-
दहं विमुक्तोऽस्मि शरीरबन्धात् ।
सर्वोपदेष्टुः पुरुषोत्तमस्य
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

मूढान्विवेकिनः कृत्वा लोके सर्वोपदेशकः ।
यस्तिष्ठति च तं श्रीमद्वासुदेवगुरुं भजे ॥

अनुग्रहार्थं मर्त्यानां संस्कृतानधिकारिणाम् ।
विवेकसारः श्रोतॄणां रच्यते भाषया मया ॥

अध्यारोपवादालचातब्रह्ममुनु येरुगवलेननि शास्त्रमंदु चेप्पंबडुदिगनुक अध्यारोपमुनु मुन्दरगानु निरूपिस्तु-न्नारमु ।

End: (Leaf No. 219)

समष्टिव्यष्टिरूपाय नृतजाड्यादिलक्षणम्(?) ।
शिवेशयोरुपाधिश्च नात्मा सम्यग्विवेचितः ॥

समष्टिव्यष्ट्युपाधिभ्यां जीव ईश्वर इत्यपि ।
भिन्नवद्भाति यस्सोयमात्माऽभिन्नश्च वस्तुतः ॥

मयि जीवत्वमीशत्वं कल्पितं वस्तुतो न हि ।
इति यस्तु विजानाति स मुक्तो नात्र संशयः ॥

Colophon:

इति सप्तमवर्णकं समाप्तम् ॥

श्रीगुरवे नमः ॥

स्थूलं सूक्ष्मं कारणं वा शरीरं किं तदात्मनः ।
विलक्षणत्वमेतेभ्यः किं वेत्येतद्विचिन्त्यते ॥

* *

ऐते ईविचारानकु फल मेमण्टेनु रज्जुवलने सद्रूपुण्डै जीवामृताळु वलने
आनन्दरूपुडैनट्टुवण्ठि..........।

Subject: Adhyāropaṇam. on the problem of the superposition of the unreal appearance on the reality. 1-8 Varṇakas.

Remarks:—The Ms. is in a good condition. For the other works contained herein see remarks under No. 7550 This Ms. abruptly ends in the middle of the 8th varṇaka. This work by an unknown author deals with Adhyāropa. The author gives copious Telugu commentary which he calls Vivekasāra and appears to be a Telugu Brahmin

---

॥ आनन्दप्रकरणव्याख्या ॥

7608. ĀNANDAPRAKARAṆAVYĀKHYĀ.

Burnell's Catalogue No. 6470. Page 97. Left column. Substance—Paper. Size—9 × 4½ inches. Sheets—59. (95-153). Lines—10-11 to a Page. Script—Devanāgarī. No. of Granthas—1700. Author—?. Incomplete. Not printed.

Beginning:

......सुखं मे स्यादिति प्रार्थनायाः त्वत्पक्षवदस्मत्पक्षेऽपि प्रो(मो)क्षविषयत्वात्तत्कामस्यापि कारिणः संभवात्तं प्रति काण्डद्वयप्रामाण्यसिद्धिरिति भावः। ननु प्रीत्युत्कर्षो मोक्षः। किं तु स्वर्गः। तत्कथं तत्कामो मोक्षकामस्स्यात्। कथं वा तं प्रति काण्डद्वयप्रामाण्यं तत्राह-वृष्टीति।

End:

न च यागादेः स्वर्गाद्यसाधकत्वे तत्कामस्य तस्मिन् विनियोगो युक्तिः। अतो नियोगवशादेव तत्र साध्यसाधनताधीः न मानान्तरादित्यर्थः। वेदे साध्यसाधनताधियो नियोगाधीनत्वेऽपि कामस्य कर्तृविशेषणत्वं लौकिकवदित्याशङ्क्याह— तथा हीति। वेदे साधनत्वस्य मानां..... ।

Colophon: Nil.

Subject: Ānandaprakaraṇavyākhyā; a commentary on the Ānandaprakaraṇa.

Remarks:—The Ms. is in good condition.

॥ कुतर्कनिरासः ॥

7609. KUTARKANIRĀSAḤ.

Burnell's Catalogue No. 9884. Page 95. Left column.

Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—40 (208-247). Lines—11 to a Page. Script—Grantha. No. of Granthas—1750 Author—?. Incomplete Not printed.

Beginning:

....

......लमुनिना निर्णिक्तात्मानमश्रितविग्रहं(?)

निगमशिरसां स्वाराज्ये स्वे चिरादभिषेचितम् ।

जयति समवद्देवं दास्यदुरुर्मतान्त्रिकात् (?)॥

श्रीगुरुभ्योनमः । अपि चैव स्मृत्यादयोऽपि निर्विशेषं ब्रह्माऽद्वितीयं च प्रतिपादयन्ति । यथा,

"ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।

अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥"

अत्र तावद्ब्रह्मविलक्षणः प्रत्यगात्मा । स तावज्ज्ञेय उच्यते । "नारायणं महाज्ञेयं ॥" "तमेव विदित्वाऽति-मृत्युमेति" "यदा च....मं आकाशं वेष्टयिष्यन्ति मानवाः । तदाशि.... दुःखस्यान्तो भविष्यति" इत्यादि । विरोधात्परं ब्रह्मेति निषेधाच्च न चाहं वासुदेवः ❀ ❀ "क्षेत्रज्ञमिति तद्विदुः" इत्युक्तानुस्मरणार्थत्वेन समुच्च-यासिद्धेः । तथापि सामानाधिकरण्येन स्वरूपाभेदप्रत्य-योपपत्तेश्च ।

End:

अपि चैवं मानान्तरागम्यत्वे सविशेषब्रह्मणः शास्त्रनि-

विषयमापद्येत । जगत्सोपादाननियन्तृकं, कार्यत्वाद्धटादि-
वत् । धर्माधर्मफलं सदातृकं, चेतनहिताहितक्रियाफल-
त्वात्, सेवापराधफलवेतनदण्डादिवदित्यादिभिरेव कार-
णत्वादिविशेषाणां * *
स्वात्मताविरोधिसत्ताद्येकरसतायां सत्यां सविशेषत्वं मा-
नान्तराऽगम्यमिति तुल्यम् । एतदुक्तं भवति । यथापरस्य
प्रत्यक्षाद्यनवगतरूपभेदेन ब्रह्मणस्सविशेष...........।

Subject: Kutarkanirāsa; a controversial treatise on Advaita philosophy.

Remarks:—The Ms. is in a good condition.

॥ मुक्तिसोपानपद्धतिः ॥

7610. MUKTISOPĀNAPADDHATIḤ.

S. S. Collection No. 38.

Substance—Paper. Size—$8\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—2-16. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—?. Incomplete. Not printed.

Beginning:

....

..................................सदा ॥

पुरा रागाद्रावणो हि नष्टो राज्यादिना सह ।
तस्माद्रागो मुमुक्षोस्तु त्याज्यः सर्वात्मना दृढम् ॥

द्वेषो नाम स्वार्थविघ्ने वृत्तिर्व्यग्रा प्रकीर्तिता ।
तेन नष्टः पुरा चैद्यः तस्मात्त्याज्यो मुमुक्षुणा ॥

कामस्तु सिद्धपूर्वेऽर्थेऽप्यधिकाशा प्रकीर्तिता ।
तेन प्रणष्टो नरकः तस्मात्कामं परित्यजेत् ॥

स्वार्थालाभे तु यन्मौर्ख्यं क्रोध इत्यभिधीयते ।
तेन नष्टः पुरा कंसः ततः क्रोधं परित्यजेत् ॥

स्वकीयधनलेशं तु न दद्यां यस्य कस्यचित् ।
वृत्तिर्या जायते सैव लोभः प्राज्ञैः प्रकीर्तितः ॥

End:

अहंब्रह्मेत्यवस्थान्तं समाधिरित्युक्तत्वात् अखण्डसच्चिदानन्दैकरसब्रह्माकाराकारितान्तःकरणवृत्तिसाक्षात्कारो मोक्ष इत्युक्तलक्षणो यो मोक्षः सोऽपि नित्यमुक्तस्य सर्ववृत्तिरहितस्य केवलात्मनो मामौ(?)पचारिक एव । तस्मात्परमाद्वितीयपरिपूर्णसच्चिदानन्दाखण्डैकरसकेवलब्रह्माहमस्मीति सिद्धम् ।

Colophon:

इति स्वानुभूतिप्रकरणपद्धतिः सम्पूर्णा ।

Subject: Muktisopānapaddhati; 1–7 Paddhatis.

1 रागद्वेषनिवृत्तिनिरूपणपद्धतिः ।

2 साधनचतुष्टयनिरूपणपद्धतिः ।

3 स्थूलशरीरस्वरूपनिरूपणपद्धतिः ।

4 लिङ्गशरीरनिरूपणपद्धतिः ।

5 कारणशरीरस्वरूपनिरूपणपद्धतिः ।

6 महाकारणशरीरस्वरूपनिरूपणपद्धतिः ।

7 स्वानुभूतिप्रकरणपद्धतिः ।

Remarks:—The Ms. is in a fairly good condition.,

॥ वेदान्तप्रकरणम् ॥

7611. VEDĀNTAPRAKARAṆAM.

S. S. Collection No. 38.

Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—82. Lines—8 to a Page. Script—Grantha. No. of Granthas—3500. Author—?. Incomplete (Wants end). Not printed.

Beginning:

शुक्लांबरधरं + शान्तये ।

परिणतपरसत्त्वं सत्त्वमेतस्य मूलं
नरहरिवपुरैशं धाम कामं.........
....
अहमिति विगता धीः सश्वराम्यात्मयोग्यम् ॥
कपटमतिविलासैः देशिभिर्भिन्नमार्गा-
....
निरवधिनि.....................
.........णकारिणीं विद्याम् ॥

अथ महावाक्यार्थगत तत्पदार्थो ब्रह्म निरूप्यते ।

.... ।

*　　　　　*

(Leaf No. 16)

ननु सर्वस्य वेदस्य कार्यपरत्वं न ब्रह्मणो वेदार्थता कुतस्तस्य तदेकार्थतेति न वेदान्तं हि सिद्धपरा एव तेभ्यस्तदवगमात् सत्यादिवाक्यात् कार्यस्यानवगमात् ततोऽनवगम्यमानस्यापि तदर्थत्वेऽतिप्रसङ्गात् अध्याहारस्याऽन्यायत्वात् कार्ययोग्यार्थानवगमे तदयोगात्तदर्थमात्रस्य संसर्गस्य नियोगं विनाऽनुपपत्त्यभावात् लोकेऽपि सिद्धे शब्दानां व्युत्पत्तेः शास्त्रञ्च हि तदशासनात् प्रवृत्तिनिवृत्तिशासनस्य प्रत्येकसमुदायसंमतलक्षणत्वात् हितसंस्पृष्टतदुपदेशस्य शास्त्रत्वे अतिप्रसङ्गाच्च हितञ्च सुखमेवान्यत् तत् प्रसादात्तथेति तदात्मकं ब्रह्महितं अत एव वेदान्ताः । स्वत एव पुरुषार्थनिष्ठाः एतच्च सर्वं शास्त्रनिरूपितं न चात्र वादिनोऽत्यन्तं विवदन्त इति नात्र निरूप्यते ।

एवंविधिभागोऽपि अद्वैतब्रह्मावगतिं प्राप्यैव जैमिन्याद्यभिप्राय इव विश्राम्य जैमिन्यादेरद्वैतब्रह्मावगतौ तात्पर्याभावे प्रतारकत्वं असर्वज्ञत्वं वा भवेत् ॥

End:

आत्मलाभान्न परं विद्यत इत्यादि शास्त्रान्मुक्तस्य का-

मनाप्रतिषेधात् स......मभिजायते । तत्र तत्रेति का-
मस्य संसारहेतुत्वश्रवणाच्च । न हि जीवस्य कामनां विना
परस्य सा भवितुमर्हति । तदनिष्टं कामयते । आत्मत्वायो-
गात् । न च सर्वमुक्तिरेव नास्ति । अविद्यावतां ज्ञाने
सति तन्नियमात् । अन्यथा स्वस्य मुक्त्यनर्हत्वशंकया को-
ऽपि न प्रवर्तेत । मुक्तावपि परस्य कामनाविलये अनि-
त्यानाम............ ।

Subject: Vedāntaprakaraṇa; a Vedāntic treatise by an unknown author:

Remarks:—The Ms. is in a fairly good condition. The first few leaves are almost decayed.

॥ वेदान्तोपनिषत् ॥

7612. VEDĀNTOPANIṢAD.

Burnell's Catalogue No. 9753]. Page 95. Left column. Substance—Palm leaf. Size—$16\frac{1}{2}\times1\frac{1}{2}$ inches. Leaves—5 (163-167). Lines—5 to 6 to a Page. Script—Telugu. No. of Granthas—113. Author—?. Incomplete. Not Printed.

Beginning:

श्रीगुरुभ्यो नमः । ...... श्रीशिवाय नमः ।
श्रीमत्सुरेश्वराचार्यपदाब्जभ्रमरा इमे ।
वार्त्तिकेषु रसं पीत्वा तृप्यन्त्यात्मानुभूतितः ॥

संसारकारणाविद्याध्वंसकृज्ज्ञानलब्धये ।
प्रारब्धेयं प्रयुक्तेन वेदान्तोपनिषत्परा ॥
अत्र चोपनिषच्छब्दो ब्रह्मविद्यैकगोचरः ।
तच्छब्दाश्रयवार्थस्य विद्यायामेव संभवात् ॥
उपोपसर्गः सामीप्ये तत्प्रतीचीनमाप्यते ।
ता(सा)मीप्यतारतम्यस्य विश्रान्ते स्वात्मनि क्षणात् ॥
त्रिविधस्य पदार्थस्य निशब्दोऽपि विशेषणम् ।
उपनीय महात्मानं ब्रह्मापास्तद्वयं यतः ॥
निहत्य विद्यां तज्जं च तस्मादुपनिषद्भवेत् ।
निहत्यानर्थमूलं ह्यविद्यां प्रत्यक्तया परम् ॥

End:

अविद्याब्रह्मसम्बन्धमविद्यादृष्टिकल्पितम् ।
परामृशत्यतस्सिद्धमस्याविद्येत्युदीरितम् ॥
अविद्याब्रह्मदीक्षायां ब्रह्मसम्बन्धतेत्यपि ।
ब्रह्मवृत्तपरीक्षायां नानाब्रह्मस्पृगिष्यते ॥ ११३ ॥

Colophon: Nil.

Subject: Vedāntopaniṣad based on Sureśvaravārttika.

Remarks:—The Ms. is in a fairly good condition. For the other works contained herein see remarks under No. 1441.

॥ वेदान्तोपन्यासः ॥

7613. VEDĀNTOPANYĀSAḤ.

Burnell's Catalogue No. 9875 h. Page 95. Right column.

Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—8. Lines—8 to a Page. Script—Grantha. No. of Granthas—300. Author—? Incomplete. Not printed.

Beginning:

...भ्रमे दोषमाह। अन्यथेति॥ जडेति॥ हेतुगतं विशेषणं दुःखादौ व्यभिचारादपि न वृत्तिमात्रस्य व्यवहारहेतुतेति द्रष्टव्यं। जडस्यापि संविद्विषयस्य संभवात् तत्त्वेनार्थान्तरतेत्याशङ्क्याह॥ न चैवमिति॥

End:

ननु क्रियासाध्यस्यैव फलत्वात् ज्ञानक्रियासाध्याऽविद्यानिवृत्तिरेव फलं। तथा च ब्रह्मैव फलव्याप्यमिति न च वाच्यमित्याह॥ न चेति॥ हेतुमाह॥ अथेति॥ आरोपिताऽभावस्यैवाधिष्ठानमात्रत्वं प्रसाधनादिति भावः। अविद्यानिवृत्तिरधिष्ठान.... ॥

Subject: Vedāntopanyāsaḥ.

Remarks:—The Ms. is in a fairly good condition. This seems to be a commentary on some minor vedāntic work. For the other works contained herein see remarks under No. 1500.

॥ परमहंसचर्या ॥

7314. PARAMAHAMSACARYĀ.

Burnell's Catalogue. No. 9586 a.

Substance—Palm leaf. Size—$18\frac{3}{4} \times 1$ inches. Leaves—166,

Lines—5 to a Page. Script—Grantha. No. of Granthas —3200. Author—Sadāśivabrahman. Complete. Not Printed.

Beginning:

यस्मिन्नाभाति विश्वश्रीर्मरीचिव तरङ्गिणी ।
तमानन्दघनं वन्दे भगवन्तं जगद्गुरुम् ॥ १ ॥

श्रुतिस्मृतिपुराणादिशास्त्रेषु प्रतिपादिताम् ।
लिखामि परहंसानां चर्यामार्यजनेडिताम् ॥ २ ॥

परमहंसचर्या हि यमनियमभेदेन द्विविधा । यमनियमौ च असूत्रयत् पतञ्जलिः 'अहिंसासत्यमस्तेयब्रह्मचर्याऽपरिग्रहा' इति यमाः ॥

End.

सुखेन वर्तध्वमविद्ययागतं
मनुष्यभावं च विहाय देहजम् ।
विहाय सङ्कल्पविकल्पवासना-
मनुग्रहेणाहमवोचमास्तिकाः ॥ १२ ॥

Colophon:

इति उपपुराणसंग्रहस्समाप्तः ।

Subject: Paramahamsacarya; an elaborate treatise on the nature and characterestics of the Paramahamsas with profuse quotations from the Upaniṣads, Smṛtis and Purāṇas

Remarks:—The Ms is in a decaying condition It contains the text more fully than 7615. It runs up to the end of the sec-

tion giving the substance of all the upapurāṇas which section follows the Bhāgavatasaṅgraha. For other details see under No. 6709. The other work contained herein is Ātmavidyāvilāsa.. Dr. Burnell has not noticed this work under this Number.

॥ परमहंसचर्या ॥

7615. PARAMAHAMSACARYĀ.

Burnell's Catalogue No. 9858.

Substance—Palm leaf Size—$11\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves —165 (2-166). Lines—6 to a Page. Script—Grantha. No. of Granthas—2500. Author—Sadāśivabrahman. Incomplete. Not printed.

Beginning and subject—Same as No. 7614.

End:

स्वभाग्यं श्लाघते द्वाभ्याम् ॥
त्वन्यायां रचिते लोके वस्तुबुद्ध्या गृहादिषु ।
भ्रमन्ति कामलोभेर्ष्यामोहविभ्रान्तचेतसः ॥ ६ ॥

Colophon: (Leaf No. 162)

इत्यष्टमस्कन्धसारसंग्रहः ।

Remarks:—The Ms. is in good condition.

For other works contained herein vide remarks under 7137. Dr. Burnell does not notice all the works in this Ms. He notices only the Svānubhūtiprakāśikā.

॥ परमहंसचर्या ॥

7616. PARAMAHAMSACARYĀ.

Burnell's Catalogue No. 9856 c.

Substance—Palm leaf. Size—$11\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—212 (3-214) Lines—7 to a Page. Script—Grantha. No. of Granthas—3200. Author—Sadāśivabrahman. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 7614.

Remarks:—The Ms. is in good condition. The other works contained herein, are:—

१ स्वानुभूतिप्रकाशिका २ आत्मविद्याविलासः ३ स्वप्नोदितम् ४ आत्मानुसन्धानम् ।

Dr. Burnell has not noticed this work under this No.

॥ परमहंसचर्या ॥

7617. PARAMAHAMSACARYĀ.

Burnell's Catalogue No. 9857 c

Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—82 (1-82). Lines—8 to a Page. Script—Grantha. No. of Granthas—3200 Author—Sadāśivabrahman. Complete. Not Printed,

Beginning, end, colophon and subject—Same as No. 7614.

Remarks:—The Ms is in decaying condition. The other works contained herein are the same as under No 7616.

This work has not been noticed by Dr. Burnell under the above No.

॥ परमहंसचर्या ॥

7618. PARAMAHAMSACARYĀ.

Burnell's Catalogue No. 9535 a.

Substance—Palm leaf. Size—19 × 11½ inches. Leaves—174 (1-174). Lines—7 to a Page. Script—Grantha. No. of Granthas—3200. Author—Sadāśivabrahman. Incomplete. Not printed

Beginning, end. colophon and subject—Same as No. 7614.

Remarks:—The Ms. is in good condition. The other work contained herein is Ātmavidyāvilāsa.

Dr. Burnell has not noticed this work under this No.

॥ प्रणवार्थप्रकाशिकाव्याख्या ॥

7619. PRAṆAVĀRTHAPRAKĀŚIKĀ-VYĀKHYĀ.

Burnell's Catalogue No. 9882 b. Page 95. Right column.

Substance—Palm leaf. Size—16¼ × 1¼ inches. Leaves—25 Lines—8 to a Page. Script—Grantha. No. of Granthas—500. Author—Kaivalyānandatīrtha. Complete. Not Printed.

Beginning:

मत्स्यः स्नानपरः फणी पवनभुङ् मेषस्तु पर्णाशनो
नीराशी स तु चातकः प्रतिदिनं शल्यबलं(?) मूषिकः ।
भस्मोद्धूलनतत्परः खलु खरः ध्याने रतो वै बकः
किं तेषां फलमस्ति तेन विधिना ज्ञानप्रधानं (तपः) ॥

सर्वोपनिषदां सारभूतेन प्रणवेन यम् ।
जानन्ति यतयः सच्चित्सुखाद्वैतमवैम्यहम् ॥

इह खलु श्रीमान् कैवल्यानन्दयोगीश्वरो नाम कश्चिद्विपश्चित् बहुजन्मसुकृतनिकरपरिपाकवशादुपजातेश्वरानुग्रहसमासादितकरतलामलकीकृतपरब्रह्मतत्त्वः परमकारुणिकश्रीगुरूपदिष्टप्रणवार्थज्ञानात् विगलितनिखिलबन्धः स्वयं नित्यनिरतिशयानन्दस्वप्रकाशनिष्प्रपञ्चपरिपूर्णप्रत्यगात्मानमनुबोभूयमानौ(नो) मुमुक्षुजनतासमनुजिघृक्षया तापनीयोपनिषत्प्रतिपादितप्रकारेण प्रणवार्थं कैश्चिच्छ्लोकैस्संजग्रीगृहीष्ट । ते च यथामति व्याख्यायन्ते ।

अकारोकारवर्णाभ्यां + तथोमिति ॥

End.

य इत्थं + आनन्दवारिधिः ॥

एवं गुरोः सकाशादोंकारतत्त्वं सम्यक्ज्ञात्वा उक्तप्रकारेण मनः स्वात्मनि प्रणिदधन् परमहंसः अत्रैव सर्वानर्थेभ्यो विमुक्तस्सदा स्वप्रकाशपरमानन्दरूपेणावतिष्ठेत ॥ "ब्रह्मविदाप्नोति परं," "तरति शोकमात्मवित्" "यो वेद निहितं गुहायां" "सोऽविद्याग्रन्थिं विकिरतीह सोम्य," "भिद्यते हृदयग्रन्थिः" "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिश्रुतिशतेभ्यः ।

श्रीमहादेवतीर्थानां शिष्येण यतिनां कृते ।
कृता कैवल्यतीर्थेन प्रणवार्थप्रकाशिका ॥

ग्रन्थकर्ता स्वस्य प्रथितविभवमाह— योगिपरमहंसेश्वरशिष्यताकीर्तनेन स्वकृतश्रुत्यन्तरहस्यप्रणवार्थसुग्रहात्मकप्रकरणस्य परमहंसैरेव विज्ञेयतां प्रदर्शयन् अर्थाद्गृहस्थादीनां यतीनामपि परमहंसव्यतिरिक्तानां प्रदर्शनीयतां सूचयन् ग्रन्थनामनिर्देशपूर्वकं प्रकरणमुपसंहरति— श्रीमहादेवेति ।

स्वप्रकाशचिदानन्दसाक्षित्यप्रत्यगद्वयः ।
नृसिंहवाक्यगम्योऽहमसंगः परमेश्वरः ॥

Colophon.

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमहादेवतीर्थपूज्यपादशिष्यश्रीकैवल्यानन्दतीर्थभगवत्पादकृता स्वकृतप्रणवार्थप्रकाशिकाव्याख्या समाप्ता । ओं सांबपरमेश्वराय नमः ।

Subject: Praṇavārthaprakāśikāvyākhyā, a commentary by the author on his own Praṇavārthaprakāśikā.

Remarks:—The Ms. is in a fairly good condition. The other works contained herein are:—

१ अष्टाङ्गयोगः २ सोपानपञ्चकम् ३ प्रणवार्थप्रकाशिका ।

The author of this work calls himself as the desciple of Mahādevatīrtha and himself commented his own work expounding the meaning and significance of Praṇava as given in Tāpanīyopaniṣad.

॥ उपदेशसारः ॥

7620. UPADEŚASĀRAḤ.

Burnell's Catalogue No. 6413. Page 93. Left column. Substance—Paper. Size—9¾ × 4½ inches. Sheets—27. Lines—11 to a Page Script—Devanāgarī. No. of Granthas—600 Author—Viśvanātha. Complete. Not printed.

Beginning:

श्री विघ्नेश्वराय नमः ॥

यत्सर्वं सकलं प्रवृत्तिरखिला यं चाश्रितो येन तत्
भातीदं प्रियमत्र जातमनिदं यस्मै यतोऽभूज्जगत् ।
यस्यात्मत्वमवाप्य संसृतिरगादन्तर्हि यस्मिन्निदं
स त्वं श्रीनृहरे ममाप्यनुभवं देहि स्वयं तादृशम् ॥

करण...गणानामीशमाद्यं गणेशं
परतरनिजरूपावृत्तिविघ्नैकनाशम् ।
धृतभवरतवृत्तिच्छेदसद्वेदपाशं
मम हृदयनिवासं तं नमाम्यात्मभासम् ॥ २ ॥

* *

घटादेस्स्फुरत्ता तदीया च सत्ता
तदानन्दता मत्त एवोद्गतातः ।

* *

अयं तत्त्वहं ज्ञातमित्थं प्रसादात्
गुरोर्यस्य तं काशिराजं नमामि ॥ ४ ॥

इत्थं नत्वा गुरुं देवं विश्वनाथेन धीमता ।
उपदेशस्य सारोऽयं ग्रन्थमुद्गृथ्यते मया ॥

श्रीमच्छङ्करभावार्थमाकलय्य हृदा परम् ।
तद्ग्रन्थार्थपथार्यं(च) रच्यते स्वसुखाय हि ॥

नन्विदं वेदान्तप्रकरणं । प्रकरणं नाम
"शास्त्रैकदेशसंबद्धं शास्त्रकार्यान्तरे स्थितम् ।
आहुः प्रकरणं नाम शास्त्रभेदं विपश्चितः ॥' इति ॥

End:

किं पल्लवितेन । नायं शरीरमात्रार्थेच्छानिच्छापरेच्छा-
प्रापितानि सुखदुःखलक्षणानि आरब्धफलानि अनुभवन्
अन्तःकरणभासादीनामवभासकस्सन् तदवसाने सति अ-
ज्ञानतत्कार्यसंस्काराणामाविनाशात् परमकैवल्यमानन्दै-
करसं × ब्रह्म अवतिष्ठते । × ×
न स पुनरावर्तते । ओं तत्सद्ब्रह्मार्पणमस्तु ।

Colophon:

इति श्री उपदेशसारे ससाधनजीवन्मुक्तिनिरूपणं नाम दशम
उल्लासः । समाप्तोऽयं ग्रन्थः । इति श्री विश्वनाथस्वामिविर-
चित उपदेशसारग्रन्थः संपूर्णः ।

श्रीकृष्णार्पणमस्तु ।

Subject: Upadeśasāra, a prakaraṇa in 10 Ullāsas modelled after Śrī Śaṅkara's Upadeśasāhasrī.

Remarks:—The Ms. is in a fairly good condition. There is a

transcript copy of this Ms. in the library. Vide T. V. No. 455. The author should have belonged to Northern India as he mentions Kāśirāja as one of his Gurus.

॥ पञ्चरत्नकारिका ॥

7621. PAÑCARATNAKĀRIKĀ

P. A. Collection No 81

Substance—Paper. Size—$9\frac{7}{8} \times 4\frac{7}{8}$ inches. Sheets—15 Lines—8-10 to a Page. Script—Devanāgarī No. of Granthas—800. Author—Sadāśiva Complete. Not printed.

Beginning:

श्रीगुरुभ्यो नमः ॥

रामेन्द्रस्वामिनं वन्दे सच्चिदानन्दविग्रहम् ।
मुमुक्षूणामभयदं ब्रह्मात्मैक्यप्रदं गुरुम् ॥ १ ॥

यत्कृपालेशतो वाणीं पवित्रीकर्तुमुद्यतः ।
सदाशिवः करोतीमाः पञ्चरत्नस्य कारिकाः ॥ २ ॥

॥ मू ॥

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यजताम् ।
पापौघः परिभूयतां भवसुखे दोषोऽनुसन्धीयताम्
आत्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥ १ ॥

व्याख्या कारिकाः ॥

अस्यार्थः । अत्रेदमभिधीयते ।

इह तु ब्रह्मचर्याङ्गसाधनेन द्विजोत्तमः ।
स्वाध्यायविधिना सम्यक् तदर्थश्रवणो भवेत् ॥ ३ ॥

End:

* *

शुद्धां वाणीं तथा बुद्धिमकरोन्मुक्तिसिद्धये ।
श्रीमद्रामेन्द्रकृपया शिवमूलं शिवाग्रजः ।
कारिकाः पञ्चरत्नानामकरोत्परितुष्टये ॥

Colophon:

इति श्रीमत्पञ्चरत्नस्य कारिकाः समाप्ताः ।
श्री सदाशिवार्पणमस्तु ।

Subject: Pañcaratnakārikā, a commentary on Śaṅkāra's Upadeśa Pañcaratna, in Kārikās.

Remarks.—The Ms. is in a fairly good condition.

Sadāśiva, the author of this metrical commentary on Śrī Śaṅkara's Upadeśapañcaratna, is the pupil of one Ramendrasvāmin and thus is to be distinguished from the famous Sadāśivabrahman.

॥ वेदान्तसंग्रहव्याख्या—प्रकाशिका ॥

7622. VEDĀNTASAṄGRAHAVYĀKHYĀ—PRAKĀŚIKĀ.

Burnell's Catalogue No. 9801. Page 94. Right column. Substance—Palm leaf. Size—16¾ × 1½ inches. Leaves—138. Lines—7-9 to a Page. Script—Grantha. No. of Granthas—4500. Author—Mahādevendramuni. Complete. Not printed.

Beginning:

श्रीमत्स्वयम्प्रकाशाख्यमहते महसे नमः ।
यन्मोहतिमिरोद्दण्डचण्डभानुशतायते ॥

वेदान्तसंग्रहग्रन्थं व्याकरोमि यथामति ।
स्वबुद्धिशुद्ध्यै योगीन्द्राः क्षन्तुमर्हन्ति साधवः ॥

समुद्रकलशन्यायात्स्वधर्मादेव केवलम् ।
महादेवमुनीन्द्रेण पूज्यते गुरुरादरात् ॥

श्रीगुरोः कृतिसम्बन्धान्मद्वाक्यं श्लाघ्यमेव हि ।
रथ्योदकं यथा गङ्गाप्रवाहपतनाच्छुभम् ॥

इह खलु लोकानुग्रहार्थमवतीर्णो भगवांश्चन्द्रचूडः स्वयम्प्रकाशाभिधानोऽस्मद्गुरुः जननमरणरूपसंसारमहातापतप्तानां भाष्यादिमहानदीप्रवाहगमनासमर्थानां तापनिवृत्त्यर्थं प्रपापरिकल्पनमिव ऋजुमार्गेण ब्रह्मात्मविज्ञानाय वेदान्तसंग्रह इति प्रकरणं कर्तुमविघ्नेन परिसमाप्त्यर्थमाशीर्नमस्क्रियावस्तुनिर्देशो वेति न्यायात् शिष्टाचारपरिप्राप्तमादौ स्वगुरुनमस्काररूपं मंगलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति ।

मू ॥ गोपालयोगीन्द्रगुरोः प्रसादात्
ब्रह्माहमेतन्मयि भाति विश्वम् ।
स्वयम्प्रकाशो मुनिरादरेण
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

End:

॥ मू ॥

आरण्ये रविशशिधूमकेतुवाचां

शंसन्तौ स्वयमवशिष्टमेकमुक्तम् ।

यज्ज्योतिर्विमलमनन्तमद्वितीयं

तं रामं गुणनिधिमाश्रयेऽभिरामम् ॥

*　　　　　　*

एवं प्रलयजलधिकल्पनिरवधिकानन्दरूपत्रिविधपरिच्छेदरहितमतएव विमलमतएवाप्रमेयानन्दरूपत्वादेव गुणनिधिमतएवाभिरामं श्रीराममहमाश्रये सेवे ॥

यदज्ञता लोकसृतिप्रवर्त्तिका

वदन्ति शास्त्राणि च कोटिशो यम् ।

यदात्मनात्मानमयासिषं तं

स्वयंप्रकाशं गुरुमाश्रयेऽहम् ॥

श्रीमत्स्वयंप्रकाशाय गुरवे स्वात्मने नमः ।

यदत्यन्तं तपः पक्कं निवेदितमिदं फलम् ॥

स्वयम्प्रकाशयोगीन्द्रपादप्रवणचेतसा ।

यथामति व्याकृताऽयं मया वेदान्तसंग्रहः ॥

मया कृतेयं वेदान्तसंग्रहस्य प्रकाशिका ।

विद्वद्योग्यस्य गरुडसंचारे(?) मक्षिकागतिः ॥

एकाक्षरार्थज्ञानेन कृती वेदान्तसंग्रहे ।
भवेदित्यादरेणायं स्वधर्मत्वात् ....॥

गुरोर्वीक्षा पेतत्पुंसि यदि मूकोऽपि वाक्पतिः ।
स्याल्लंघयेद्गिरिं.... .... ॥

.... ।
....गुरुकृपारसम् ॥

अद्वैतरसपूर्णाब्धौ पूरितेत्यविवक्षया ।
सुरानन्यो नरो(?) मज्जन्मद्व्याख्याख्ये भवेत्कृती ॥

किं प्रत्युपकृतिं कुर्मो.. कस्य भवाद्गुरोः ।
अर्पयामि ममात्मानं स्वयम्पूर्वप्रकाशके ।

Colophon:

इति श्रीवेदान्तसंग्रहव्याख्यानं समाप्तम् ॥

स्वयम्प्रकाशमुनिना कृतो वेदान्तसंग्रहः ।
यज्ञनारायणाख्येन लिखितष्टीकया सह ॥

बिन्दु + सज्जनाः ॥

Subject: Vedāntasangrahavyākhyā; a commentary on Vedāntasangraha of Svayamprakāśa a short Prakaraṇa in verses.

Remarks: —The Ms. is in a fairly good condition. After the colophon is given the following verse.—

वीणावादनचतुरा शोणाधरसंगि चारुदशनाभा ।
वाणी वसतु ममेशा वाणीदेशे वरप्रदा देवी ॥

The Ms. seems to have been written by one Yajnanārāyaṇa.

The author is a desciple of Svayamprakāśamuni who in his turn is the desciple of Gopāla Yogīndra and is the author of many Vedānta works like Haratattvamuktāvalī.

॥ वेदान्तसंग्रहव्याख्या—प्रकाशिका ॥

7623. VEDĀNTASANGRAHAVYĀKHYĀ—PRAKĀŚIKĀ.

Burnell's Catalogue No. 9802. Page 98. Right column.
Substance—Palm leaf. Size—16 × 1½ inches. Leaves—195. Lines—6-7 to a Page. Script—Telugu. No. of Granthas—4500. Author—Mahādevendramuni. Complete. Not Printed.

Beginning, end, colophon and subject—Same as No. 7622.

Remarks:—The Ms. is in a fairly good condition. This Ms. is a copy of the previous one.

॥ अनिर्वचनीयख्यातिसिद्धिः ॥

7624. ANIRVACANĪYAKHYĀTISIDDIḤ.

S. S. Collection No. 107.
Substance—Palm leaf. Size—14½ × 1½ inches. Leaves—89. Lines—8-9 to a Page. Script—Telugu. No. of Granthas—1000. Author—?. Incomplete. Not printed.

Beginning:

श्रीगणपतये नमः ।

सदनन्तचिदानन्दे जगती यत्र जायते ।
रजतादीव शुक्त्यादौ तदेवाहं परा गतिः ॥

ननु देशान्तरीयरजतादेरेव भानोपपत्तौ इदं रजतमित्यादिभ्रमस्थले शुक्त्यादौ रजताद्युत्पत्तिकल्पनेन गौरवादिति चेन्न ।

End:

अपि च फलैरपि घटो न घट इत्यादि भ्रमे घट इत्यादि ज्ञानस्य निर्धर्मितावच्छेदकस्यैव विरोधित्वमुच्यते । तन्न्यायेन शुद्धमिति तदन्यत्वरूपजत्वविशिष्टस्याविद्यादिप्रमां प्रति शुद्धचिन्मात्रगोचरज्ञानस्य विरोधित्वं निष्प्रत्यूहं । न च परमते तादृशभ्रमेच्छाविरहविशिष्टस्यैव तादृशज्ञानस्य विरोधित्वं । सिद्धान्ते तु उक्तज्ञानमात्रस्य विरोधित्वमिति वैषम्यमिति वा.... वीतरागपुरुष एव मोक्षहेतुज्ञानोदयेन तादृशज्ञानस्य.. भ्रमेच्छाविरहविशिष्टत्वात् ।

Subject: Anirvacanīyakhyātisiddhi.

Remarks:—The Ms. is in good condition.

The name of the work is not known but it deals with Anirvacanīyakhyātisiddhi.

॥ बोधसारः ॥

7625. BODHASĀRAḤ.

J. L. Collection No. 986.

Substance—Paper. Size—10 × 4¾ inches. Sheets—19. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—520. Author—? Incomplete. Not printed.

Beginning:

....चिकुतूहलेनैव विदुषां प्रियकाम्यया ।
मंगलाचरणं कृत्वा बोधसारो निबध्यते ॥

.....................................त्मनः ।
विघ्नविध्वंसिनीं शक्तिं गणराजमुपास्महे ॥ २ ॥

....
स्मरामि तामहं भक्त्या ज्ञानशक्तिं सरस्वतीम् ॥ ३ ॥

....
तापत्रयापहार्येषा कृपा ब्रह्मामृतप्रभा ॥ ४ ॥

End:

....
यदा पुनः समायाति पुनस्तस्माद्बिभेत्यसौ ॥

Subject: Bodhasāra.

Remarks:—The Ms. is in a very decayed condition.

॥ वेदान्तसंज्ञाप्रकरणम् ॥

7626. VEDĀNTASAMJÑĀPRAKARAṆAM.

J. L. Collection No. 990.

Substance—Paper. Size—10 × 5 inches. Sheets—11. Lines—18 to a Page. Script—Devanāgarī. No. of

Granthas—290 Author—? Incomplete. Not Printed.

Beginning:

श्रीगणेशाय नमः ।

विश्वेशं माधवं ढुण्ढि दण्डपाणिञ्च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥

संज्ञाप्रकरणप्रारम्भः ॥

श्रीमद्गुरोः पादयुगं नत्वा तस्य प्रसादतः ।
वेदान्तसंज्ञाः प्रत्येकं निरूप्यन्ते यथामति ॥

'अध्यारोपापवादाभ्यां विष्टपञ्चप्रपञ्चतः ।'

इति वृद्धवचनम् । अत्र अध्यारोपो नाम वस्तुन्यव-स्त्वारोपः । वस्तु सच्चिदानन्दात्मकं ब्रह्म । वस्तुज्ञानं त-ज्जन्यमहाप्रपञ्चः । प्रपञ्चद्वयं ज्ञानाज्ञानद्वयम् । सूक्ष्मश-रीरद्वयं । स्थूलशरीरद्वयं । शक्तिद्वयं । निःश्रेयसाद्वयम् ॥

End:

षड्भावविकाराः षडूर्मयः षट्कौशिकः.........गुणत्रयं कर्मत्रयं वचनादिपञ्चकं सङ्कल्पादिचतुष्टयं.... ।

Subject: Vedāntasamjñāprakaraṇa, a short work dealing with the explanation of words used in Vedānta.

Remarks:—The Ms is in a decaying condition. The introductory verse suggests that the author should have been a resident of Benares.

॥ सर्वदर्शनसंग्रहः ॥

7627. SARVADARŚANASAṄGRAHAḤ.

Burnell's Catalogue No. 9865. Page 96. Right column.

Substance—Palm leaf. Size—$15\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—149. Lines—6 to a Page. Script—Telugu. No. of Granthas—3500. Author—Vidyāraṇya. Complete. Printed.

Beginning:

नित्यज्ञानाश्रयं वन्दे निःश्रेयसनिधिं शिवम् ।
येनैव जातं मह्यादिकार्यजातं सकर्तृकम् ॥

* *

अथ कथं परमेश्वरस्य निःश्रेयसप्रदत्वमभिधीयते । बृहस्पतिमतानुसारिणा नास्तिकशिरोमणिना चार्वाकेण तस्य दूरोत्सारितत्वात् ।

End:

'तत्तु समन्वयात्' इति चतुर्थे सूत्रे प्रथमवर्णकेन वेदान्तानां ब्रह्मणि तात्पर्यं प्रतिपत्तिविधिशेषतया ब्रह्मप्रतिपादकत्वं प्रत्यक्षेऽपि दिङ्मात्रं प्रदर्शितम् । शिष्टं शास्त्र एव स्पष्टमिति सकलं समञ्जसम् ॥

Colophon:

इति सायणाचार्यविरचिते ..... सकलदर्शनशिरोऽलङ्काररत्नं
श्रीमच्छाङ्करदर्शनम् ॥

सर्वदर्शनसंग्रहं(हः) सम्पूर्णम्(ः) ॥

Subject: Sarvadarśanasaṅgraha: A treatise dealing with the main doctrines of the different schools of Indian Philosophy: i e.

चार्वाक, बौद्ध, जैन, रामानुज, पूर्णप्रज्ञ, नकुलीपाशुपत, शैव प्रत्यभिज्ञा, रसेश्वर, वैशेषिक, नैय्यायिक, जैमिनि, पाणिनि, साङ्ख्य, योग, and शाङ्करदर्शन.

Remarks:—The Ms is in a fairly good condition. This work is published with a commentary by Bhandarkar Oriental Research Institute, Poona. It is also translated into German by P. Deussen.

॥ चतुर्मतसारसंग्रहः ॥

7628. CATURMATASĀRASAṄGRAHAḤ.

Burnell's Catalogue No 9859 b. Page 93. Right column. Substance—Palm leaf Size—13×1½ inches. Leaves—58 (1-22+21-56). Lines—9 to a Page. Script—Grantha. No. of Granthas—2000. Author—Appayyadīkṣita. Complete Not printed.

Beginning:

......नमः ।

(यन्नाना)भाष्यशाखोदितफलविततिः प्रौढनानारसाढ्या
यस्मिन् मूलं निरूढं फलमधिकतरस्वादुनारुह्य लभ्यम् ।
यस्य प्रेक्षैव देहद्वयतदनुगतप्रत्यगस्सोपि विद्ते(?)
सूत्रात्मा पारिजातस्सकलमभि(मतं) मह्यमर्थं स दद्यात् ॥१॥

आनन्दतीर्थमुनिलक्ष्मणदेशिकेन्द्र-
श्रीकण्ठयोगिपदवीरदवीयसीर्नः ।
आचार्यपादसरणिं च विविच्य सोऽर्थं
संगृह्यते मतचतुष्टयसारलेशः ॥ २ ॥

आदावानन्दतीर्थीयामनुसृत्य मतस्थितिम् ।
न्यायमुक्तावली रम्या विशदार्था विरच्यते ॥ ३ ॥

ओं अथातो ब्रह्मजिज्ञासा ।

ब्रह्म स्वप्रभमेव जीवमखिलैर्धर्मैरपेतं सदा
वेदान्ताः प्रतिपादयन्ति बलिभिस्तात्पर्यलिङ्गैर्युताः ।
किं तत्रास्ति विचारणीयपदवीमादौकमानं सता-
माचार्येण यदर्थमत्र भवता शास्त्रं समारभ्यते ॥

End:

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥

इति निरवग्रहमीश्वरतागणमभ्युपगच्छासि विश्वपतौ
भवति शतक्रतुनीतिसमाश्रयणाचदुपासनसिद्धजने ।
श्रुतिरपि तस्य विभूतिमनेकविधां महतीमुपदर्शयते
तदखिलविष्टपसृष्ट्युपसंहरणाद्य........ ॥

....

.............................मिमां नियताम् ।
न यदुपलभ्यमुपासनया कृतयापि न तल्लभते पुरुषः
प्रभवति तत्र तु सांबशिवः परमेश्वर एव महामहिमा ॥

कविराजविराजितम् ॥

Colophon: (Leaf No. 22)

इति श्रीमत् + अप्पय्यदीक्षितस्य कृतौ चतुर्मतसारसंग्रहे न्यायमुक्तावल्याख्ये प्रथमपरिच्छेदे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

Leaf No. 21.

इति + चतुर्मतसारसंग्रहे नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

Leaf No 37.

इति + चतुर्मतसारसंग्रहे नयमणिमालाख्ये तृतीयपरिच्छेदे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

Leaf No 58.

इति + चतुर्मतसारसंग्रहे नयमञ्जर्याख्ये चतुर्थपरिच्छेदे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

नयमञ्जर्याख्यश्चतुर्थपरिच्छेदः समाप्तः । हरिः ओं ।

करकृतं + सन्तः ॥

Subject: Caturmatasārasaṅgraha, a compendium of the four schools of thought based on the Brahmasūtras.

I. Pariccheda leaves 1-22: Nyāyamuktāvalī—The Mādhva School.

II. Pariccheda: This is missing completely excepting for the last one leaf number 21, giving us the colophon. This chapter is called Nayamayūkhamālikā and expounds the Rāmānuja School.

III. Pariccheda 21-37: Nayamaṇimālā: The Śaiva School of Śrīkaṇṭha.

IV. Pariccheda: 37-58: Nayamañjarī: The Advaita School of Śrī Śaṅkara.

Remarks:—The Ms. is in a fairly good condition. It seems to be really made up of two originally different bundles for after leaf No 22, the numbering is not in Grantha Characters but in Telugu.

This work of Śrī Appayya Dīkṣita is a Synopsis of the four Vedantic Schools of Dvaita, Viśiṣṭādvaita and Advaita and Śivādvaita. Each school is dealt with in one Pariccheda which is further split into chapters according to those of the Brahmasūtras. The chapter on Advaita is written in verses, in all the different metres.

Of these, the Viśiṣṭādvaita chapter alone, called Nayamayūkhamālikā, has been printed in the Viśiṣṭādvaita Vaijayantī, a collection of Viśiṣṭādvaita works, by V. N. Kṛṣṇamāchāriar at Tirunāgeśvaram, Kumbhakoṇam.

The chapter on Śaiva, Nayamaṇimālā, has been printed along with the author's Śivārkamaṇidīpikā by Pandit Hālāsyanātha Śāstri in his Bhāratīmandiram Sanskṛt Series.

There is a transcript copy of this Ms. in this library vide T. V. No 66.

॥ वादनक्षत्रमालिका ॥

7629. VĀDANAKṢATRAMĀLIKĀ.

Burnell's Catalogue No. 6498 Page 91. Right column.

Substance—Paper. Size—$11\frac{3}{4} \times 5\frac{1}{2}$ inches. Sheets—181

(Sheets 25-26-27-30-41 to 55 sheets are missing). Lines —12 to a Page. Script—Devanāgarī. No. of Granthas—4000 Author—Appayyadīkṣita. Incomplete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

तन्त्रान्तरेष्वनुपपादितमर्थजातं
यत्सिद्धवद्व्यवहृतं ध्वनितं च भाष्ये ।
तस्य प्रसाधनमिह क्रियते नयोक्त्या
बालप्रियेण मृदुवादकथापथेन ॥ १ ॥

* *

कुण्डपायिनामयनाख्ये सत्रे श्रूयते । 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति' इति ।

End:

न खलु ब्रह्मानन्दाभावान्मुक्तः कश्चिन्मनुष्यगन्धर्वानन्दमात्रमनुभवन्नास्ति । सर्वेषां मुक्तानां निरतिशयब्रह्मानन्दानुभवसत्वात् । तस्मात्त्वदनुमानं बाधितविषयं न तु मदनुमानमिति सर्वे वैषयिकानन्दाः शेषाः परब्रह्मानन्दस्येति सिद्धम् ॥

Colophon:

इति ब्रह्मानन्दवैषयिकानन्दाभेदसमर्थनवादः ।

इति श्रीमत् भरद्वाजकुलजलधिकौस्तुभाद्वैतविद्याचार्यविश्वजिद्याजि श्रीरङ्गराजाध्वरिसूनोरप्पय्यदीक्षितस्य कृतौ

नक्षत्रमालिका सम्पूर्णा। श्रीरस्तु ॥

विद्गुरोः + तनूजः ॥

Subject: Vādanakṣatramālikā; 27 discussions on various topics as pūrvapakṣas in the Śaṅkara Bhāṣya.

Remarks:—The Ms. is in a decaying condition.

This controversial work of Appayya Dīkṣita has been published by the Śrī Vāṇi Vilās Press, Srirangam. Of the 27 Vādas in this work, the first 8 relate to topics of the Pūrvamīmāṃsā, while the remaining 19 deal with topics of the Uttaramīmāṃsā. Hence the work is also called Pūrvottaramīmāṃsā Vāda Nākṣatramālā

॥ वादनक्षत्रमालिका ॥

7630. VĀDANAKṢATRAMĀLIKĀ.

Burnell's Catalogue No 9679. Page 91. Right column. Substance—Palm leaf Size—$18\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—149. Lines—5 to a Page Script—Telugu. No. of Granthas—4500 Author—Appayadīkṣita. Complete. Not Printed

Beginning, end, colophon and subject—Same as No. 7629.

Remarks:—The Ms. is in a fairly good condition.

॥ षड्दर्शनीसिद्धान्तसंग्रहः ॥

7631. ṢAḌDARŚANĪSIDDHĀNTASAṄGRAHAḤ.

Burnell's Catalogue No. 6397. Page 96. Right column.

Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{1}{4}$ inches. Sheets—54. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—900. Author—Rāmabhadradīkṣita and others. Complete. Not printed.

Beginning :

श्री गणेशाय नमः ॥

प्रदिशतु मङ्गलमनिशं
पञ्चाननसूनुरद्भुतः करटी ।
सञ्चरति स्वैरं य-
स्सरसं निखिलागमाग्रेषु ॥ १ ॥

कटाक्षैर्लब्धात्मा तव क इति पृष्टे स्वरजिता
क्रियैव प्रत्युक्तिर्भवतु भवदीया न कथये ।
इति स्वाभिप्रायं मधुरदरहासेन गृणतीं
शिवामीशः श्लिष्यन् भवतु भवतः स्मेरवदनः ॥ २ ॥

अस्ति व्यानम्रवैरिक्षितिपतिमकुटश्रेणिमाणिक्यजाल-
प्रेङ्खोलस्फारदीप्तिप्रकरकृतपदाम्भोजनीराजनश्रीः ।
श्रीमत्त्यागेशपादाम्बुरुहविहरणायत्तचित्तद्विरेफ-
स्मेरापाङ्गप्रसारप्रतिविहितसुधीमण्डलाखण्डलक्ष्मीः ॥ ३ ॥

अस्तोकश्रीमदेकप्रभुसुकृतपरीपाकसम्प्राप्तजन्मा
दीपाम्बागर्भदुग्धाम्बुधिलहरिसमुद्भावितः पारिजातः ।
वाणीवेणीविराजद्बकुलपरिमलोदारसाहित्यसारः
सारङ्गाक्षीविलक्षीकरणमनसिजः साहजिक्ष्माधिराजः ॥ ४ ॥

सर्वज्ञानिधिना तेन शाश्वतीं कीर्तिमिच्छता ।
सभालङ्कारतां नीतास्सादरं प्रेरिता बुधाः ॥ ५ ॥
षड्दर्शनीस्थसिद्धान्तान् सङ्गृह्णीत यथोचितम् ।
सर्वेषामुपकाराय सरलैर्वचनैरिति ॥ ६ ॥
रामभद्राध्वरिवरो रामनाथमखीश्वरः ।
नरहर्यध्वरिमणिः पेरियप्यबुधाग्रणीः ॥ ७ ॥
श्रीवेङ्कटेशविबुधः श्रीमान्यज्ञेश्वराध्वरी ।
मखी च श्रीनिवासार्यो महतामपि सम्मतः ॥ ८ ॥
शासनाक्षरमाकर्ण्य शाहराजस्य धीमतः ।
समैते शास्त्रसिद्धान्तान् सङ्गृह्णन्ति यथामति ॥ ९ ॥

प्रथमं सङ्ग्रहश्लोकः ।

अष्टौ चाष्टौ पदार्थाः षद्नयनमते तन्मितिर्मुक्तिहेतुः
षट् ते वैशेषिकाणामथ विधिविहितं कर्मकाम्यादि-भिन्नम् ।
भाट्टप्राभाकराणामुपनिषदुदितं ज्ञानमद्वैतिनाञ्चेत्
.........स च समवहितो योगिनां योगसिध्या ॥ १० ॥

प्रथमं न्यायमतं लिख्यते । तत्र प्रतिपाद्यविषयाः प्रमाणादयः षोडशपदार्थाः । तेषां तत्त्वज्ञानान्मोक्षप्राप्तिः फलम् । तथा च सूत्रम् । प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति । तत्र

प्रमायाः करणं प्रमाणम् । प्रमा च यथार्थानुभवः अनुभवो नाम स्मृतिव्यतिरिक्तं ज्ञानम् । तत्र साधारणकारणं करणम् । तच्च प्रमाणं चतुर्विधम् । प्रत्यक्षमनुमानमुपमानं शब्द इति ।

End:

असदुत्तरं जातिः । वाचोत्कर्षसमादिभेदेन बहुविधाः । अनित्यः शब्दः कृतकत्वात् घटवदित्यत्र तद्वदेवास्य मूर्तत्वं स्यादित्युत्कर्षसमजातिः । पराजयहेतुनिग्रहस्थानं तच्च न्यूनाधिकभेदाद्बहुविधम् । तेषां षोडशपदार्थानां तत्त्वज्ञानादेकविंशतिदुःखध्वंसात्मकमोक्षप्राप्तिरिति सिद्धम् ॥

Colophon:

इति सर्वदर्शनीसिद्धान्तसंग्रहे न्यायमतसिद्धान्तसंग्रहः

समाप्तः ।

॥ अथ वैशेषिकमतं निरूप्यते ॥

Beginning:

तन्मते पदार्थाः षट् तेषां तत्त्वज्ञानान्मोक्षप्राप्तिः । तथा सूत्रम् । अर्थाः षट्पदार्थाः । साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निश्रेयसहेतुरिति ।

End:

एतन्मते च प्रमाणं द्विविधं । प्रत्यक्षमनुमानं च । शब्दश्चानुमानविषया बोधकः अनुमानप्रकारश्च न्यायमत ए-

वोक्तः ईश्वरसिद्धिश्च क्षित्यादिकं सकर्तृकं कार्यत्वाद्धटव-
दित्यनुमानात् । आगमादपि तदभ्युपगतप्रकारादिति ।
उपमानं च नास्त्येवाशक्तिग्रहस्य व्यवहारादिभिरेव
सिद्धेः ॥

Colophon:

इति षड्दर्शनीसिद्धान्तसंग्रहे वैशेषिकमतसिद्धान्त-
संग्रहः समाप्तः ।

॥ अथ मीमांसकमते भाट्टमतम् ॥

Beginning:

अथ मीमांसकमतं लिख्यते । तच्च द्विविधं भाट्टमतं प्रा-
भाकरमतं चेति । तत्र पूर्वं भाट्टमतं लिख्यते । कलियुगा-
दौ बौद्धादिभिः खिलीकृतं वेदान्तमार्गमालोक्य जगदु-
ज्जीवयितुं परमकारुणिकः कुमारस्वामिरूपेणावतीर्य बौद्धा-
दिरस्य पुनः श्रुतिमार्गं प्रतिष्ठापयामासेति प्रसिद्धम् । तत्र
च प्रतिपाद्यो विषयस्तु धर्मः अधर्मश्च । धर्मस्य च साधनं
कर्म नित्यनैमित्तिककाम्यभेदात्रिविधम् ।

End:

एवं सुखदुःखादिवैचित्र्याद्भिन्नेषु जीवेषु परमात्माऽनु-
वर्तते । एवंभूतं परमात्मानं त्र्यंबकादिभिर्मन्त्रैः ध्यायन्
पूजयंश्च विरक्तो मुमुक्षुः विषयादृते परानन्दानुभूतिरूपं
मोक्षं प्रतिपद्यत इति सिद्धम् ॥

Colophon:

इति षड्दर्शनीसिद्धान्तसंग्रहे भाट्टमतसिद्धान्त-
संग्रहः समाप्तः ॥

Beginning.

अथ प्राभाकारमतं लिख्यते । पूर्वमीमांसायां द्वाद-
शलक्षण्या धर्मो विषयः ॥

End:

सच्चिदानन्दरूपं ब्रह्म निष्प्रपञ्चं निर्गुणं निष्क्रियं
जीवश्च तत्तत्स्वरूपः तस्याविद्यकं कर्तृत्वादिप्रपञ्चमि-
थ्यात्वमविद्यामूलकारणं सर्वस्य ज्ञानान्मुक्तिरित्यादि नि-
ष्प्रमाणमेव ' तस्मात्कर्मैव मोक्षसाधनमिति सिद्धम् ।

Colophon:

इति श्रीषड्दर्शनासिद्धान्तसंग्रहे प्राभाकरमतसिद्धान्त-
संग्रहः समाप्तः ।

॥ निरीश्वरसांख्यम् ॥

Beginning:

अथ सांख्यदर्शनीसिद्धान्तो लिख्यते । सांख्यशास्त्रं
द्विविधं सेश्वरं निरीश्वरं च । निरीश्वरं कापिलम् । सेश्वरं
पातञ्जलम् ।

End:

तस्मात्फलानुरागिभिः संसारेषु प्रवर्तका यागादयो
यथाविध्यनुष्ठेयाः । विरक्तैस्तु त्रिविधदुःखात्यन्तनिवृत्ति-
रूपमुक्तये तत्त्वज्ञानं संपादनीयमिति सिद्धम् ॥

Colophon:

इति श्रीषड्दर्शनीसिद्धान्तसंग्रहे सांख्यमतसिद्धान्त-
संग्रहः समाप्तः ॥

Beginning.

अथ पातञ्जलयोगशास्त्रं लिख्यते । अस्य शास्त्रस्य योगो विषयः । कैवल्यं फलम् । योगजिज्ञासुरधिकारी । योगश्च चित्तवृत्तिनिरोधः ।

End:

तथा च विरक्तस्य योगाभ्यासमाहिम्ना निरस्तालस्यादिसमस्तदोषस्य तत्वज्ञानात्सकलदुःखनिवृत्तिरूपमोक्षो भवतीति सिद्धम् ॥

Colophon:

इति षड्दर्शनीसिद्धान्तसंग्रहे पातञ्जलसिद्धान्त-
संग्रहः समाप्तः ।

Beginning:

अथ परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादमतं समस्तश्रुतीतिहासपुराणसम्मतं दूरीकृतसर्वतन्त्रासिद्धान्तं लिख्यते । लिलेखयिषितोत्तरमीमांसा चतुर्लक्षणी । तस्याश्शुद्धबुद्धमुक्तस्वभावं नित्यनिरंजननिर्विकारनिर्लेपनिष्प्रपञ्चं सच्चिदानन्दरूपं स्वप्रकाशं कूटस्थमचलं नित्यतृप्तं सर्वविद्यास्थानपरमतात्पर्यविषयीभूतमौपनिषदमखण्डचैतन्यं विषयः ।

End:

चतुर्थाध्याये क्रममुक्तिजीवन्मुक्त्यादिनिरूपणं अर्चिरादिमार्गनिरूपणं चेति इत्थं सर्वेषां तन्त्राणां अपि वात्स्यायनादीनां ब्रह्मण्येव समन्वयः इति साक्षात्परम्परया वा ब्रह्मावगतावुपयोग इति वेदितव्यम् ।

Colophon:

इति वेदान्तमतं समाप्तम् ।

॥ व्याकरणम् ॥

Beginning:

शिलायामपि चैतन्यसृजे कौशिकहर्षिणे ।
कुलदेवाय गुरवेऽप्यस्तु धर्मभृते नमः ॥

अथ व्याकरणशास्त्रं लिख्यते । व्याकरणशास्त्रस्य शब्दा विषयाः । ते च शब्दा द्विविधाः वैदिका लौकिकाश्च । वैदिका वेदेषु प्रयुक्ताः शब्दाः । वेदाश्च, ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति चतुर्विधाः ॥

End:

सप्तमे तु प्रत्ययादेशविशेषप्रकृत्यादेशविशेषाश्च विधीयन्ते । अष्टमे तु पदद्वित्वयुष्मदस्मदादेशातिङन्तस्वरतन्निषेधनलोपमतुब्वत्वसंयोगान्तलोपादिपादान्तकार्यविशेषनिष्ठानत्वप्लुतरुत्वानुनासिकानुस्वारविसर्जनीयसत्वषत्वणत्वचुत्वष्टुत्वणद्वित्ववर्णलोपादीनि कार्याणि, विवृताकारस्य संवृताकारश्च विधीयन्ते ॥

Colophon:

इति व्याकरणमतसंग्रहस्संपूर्णः ॥

फणिग्रामणिवाग्गुम्फप्राणनाड्यदुकये ।
कलये शब्दकौमुद्याः कवये गुरवे नमः ॥

अपेक्षितपरित्यागेप्यनपेक्षितवर्णने ।
इदं सन्तो न निन्दन्तु नृणां धर्मो ननु भ्रमः ॥

इदं पुस्तकं पार्थिवनामसंवत्सरे उत्तरायणे ग्रीष्मऋतौ ज्येष्ठमासे कृष्ण-
पक्षे द्वितीयायां भौमवासरे रामाभट्टेन लिखितम् ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
यादृशं पुस्तक + न विद्यते ॥

Subject: Saḍdarśanīsiddhāntasaṅgraha, a compendium of the 6 systems of Indian philosophy.

Remarks:—The Ms is in good condition.

Chapters.

1. Nyāya.
2. Vaiśeṣikā.
3. Bhāṭṭa Pūrvamīmāmsā
4. Prābhākara ,,
5. Nirīśvara, Sāṅkhya (Kāpila) Sāṅkhya.
6. Seśvara Sāṅkhya (Pātañjala)
7. Advaita (Śāṅkara)
8. Vedānta.

Though there are 2 chapters bearing these 2 different titles, they treat about one and the same system—Ad-

vaitavedānta In the former, other Vidyāsthānas and systems are examined and compromised with the Advaita, while in the latter, the principles of Advaita are set forth.

9. Vyākaraṇa.

This last chapter is beyond doubt, the work of Rāmabhadra Dīkṣita as can be seen from the Maṅgalaśloka on Rāma, and the concluding verse, which pays respect to his father-in law and author of Śabdakaumudī, Cokkanātha Makhin.

For further notes on the other 6 authors of this compilation vide introduction to this volume.

॥ षड्दर्शनीसिद्धान्तसंग्रहः ॥

7632. ṢAḌDARŚANĪSIDDHĀNTASAṄGRAHAḤ.

Burnell's Catalogue No. 9678. Page 96. Right column. Substance—Palm leaf. Size—18½×1¼ inches. Leaves—51 Lines—7 to a Page. Script—Grantha. No. of Granthas—900. Author—Rāmabhadradīkṣita and others. Complete. Not printed.

Beginning end, colophon and subject—Same as No. 7631.

Remarks:—The Ms. is in a fairly good condition.

॥ षड्दर्शनीसिद्धान्तसंग्रहः ॥

7633. ṢAḌDARŚANĪSIDDHĀNTASAṄGRAHAḤ.

Burnell's Catalogue No. 10957. Page 96. Right column.

Substance—Palm leaf Size—14×1½ inches. Leaves—62. Lines—4 to a Page. Script—Telugu. No. of Granthas—900. Author—Rāmabhadradīkṣita and others. Complete. Not printed.

Beginning, end, colophon and subject—Same as No. 7631.

Remarks:—The Ms. is in a fairly good condition.

॥ बहुविधमतखण्डनम् ॥

7634. BAHŪVIDHAMATAKHAṆḌANAM.

Burnell's Catalogue No. 11429 a Page Left column. Substance—Palm leaf. Size—16×1½ inches. Leaves— Lines—5 to a Page. Script—Grantha. No. of Granthas—5000. Author—? Complete. Not Printed.

Beginning:

मतखण्डनम् ॥

मो विद्वन् तव शिवतत्त्वमशेषदोषनिवारणहेतुभूतमरुच्य-
मासीत् । शिवस्य जगत्कारणमूर्तेः पञ्चभूतरूपाणि पञ्च-
लिङ्गानि सन्ति त्रिशूलडमरुग तेज उत्पन्नौ तद्रूपमेकलि-
ङ्गमेव लिङ्गाष्टकं भगवतोऽष्टमूर्तयः । लिङ्गद्वयं अन्तर्लिङ्ग-
बहिर्लिङ्गसंयोजनं कृत्वा चिदचिदैक्यारूढबुद्धिवृत्तिः नि-
न्द्यानिन्द्यादिद्वन्द्वैश्च रहितः सर्वं शिवमयमिति शिवाङ्कधा-
रीसन् पशुपतिस्स एव शिवः तद्धारणमात्रेण तन्मयस्स
एव मुक्तः ॥

End:

मासे शुक्लपक्षे प्रभवसंवत्सरे भूपिण्डोपरि वायुद्वयौ परिवर्तमाने प्रवाहवायोश्चन्द्रबुधशुक्ररविकुजगुरुराहुकेतुशनैश्चरा निवेशिताः स्वस्वोपरिस्था कक्षस्थाश्चक्रान्तर्वर्तिनोऽपि चक्रस्था इव भान्ति तद्वशादेव प्रागुदयः पश्चादस्तमयश्च स्ववशा प्रागस्तमयः पश्चादुदयश्च तेषामूक्षानुभवः कथमित्युक्ते कालचक्रस्थः प्रतिपद्यन्त सूत्राणि च कक्षानि तानि तानि किल प्रतिगृहं कक्षाग्रहणमाचरान्ति तद्वशात् घटादय स्वस्वकक्षानुप्राक्तनगत्या कुलालचक्रे विपरीतगतिः कीटा इव प्रतिदिनं पादोनगोक्षधृतिभूमितयोजनप्रमाणमार्गान्तरतां स्वस्वकक्षामासगतबृहल्लघुलिप्तानुभवो गतिरिति सम्यगुत्पद्यते सा सर्वेषां समापि भिन्नैव प्रतिफलति लिङ्गलिङ्गालयकृतप्रदक्षिणपुरुषगतिवचन्द्रशन्योर्योजनीयमुक्तञ्च सिद्धान्ते—

'मन्दादरेज्यभूपुत्रसूर्यशुक्रेन्दुजेन्दवः ।

परिभ्रमन्त्यधोऽधस्तात्सिद्धविद्याधरा घना ॥' इति

'चक्रास्सर्वा अपि दिविषदां चक्रलिप्ताङ्किताश्ता

वृत्तेलघ्वो लघुनि महति स्यान्महत्यश्च लिप्ताः ।

तस्मादेते शशिजभृगुजादित्यभौमेज्यमन्दा

मन्दाक्रान्ता इव खचराः भ्रान्ति यान्तः क्रमेण ॥' इति ।

ग्रहगतिरपि षोढा पूर्वपरा याम्यो....... ।

Colophon: Nil.

Subject. Bahuvidhamatakhaṇḍanam; The contents of this work as given in the side margin are as follows:—

1	शैव पूर्वपक्षसिद्धान्तौ		18	वैष्णवादिसिद्धान्तः	
2	मल्लारि ,,	,,	19	वैष्णवक्रियाभक्तिसिद्धान्तः	
3	शैवसिद्धान्तः		20	भागवत पूर्वपक्षसिद्धान्तौ	
4	दुर्गा पूर्वपक्षसिद्धान्तौ		21	वीरवैष्णव ,,	,,
5	कमला ,,	,,	22	पाञ्चरात्रवैष्णव,,	,,
6	वाणी ,,	,,	23	शार्ङ्गपाणि ,,	,,
7	भक्ति ,	,,	24	चार्वाक ,,	,,
8	शक्ति ,,	,,	25	बौद्ध ,,	,,
9	सौर ,,	,,	26	कापालिक ,,	,,
10	चन्द्र ,,	,,	27	द्वितीयकापालिक,,	,,
11	भौम पूर्वपक्षसिद्धान्तौ		28	चार्वाक ,,	,,
12	सौम्य ,,	,,	29	जैन ,,	,,
13	गुरु ,,	,,	30	सौगत ,,	,,
14	भृगु ,,	,,	31	क्षपणक ,,	,,
15	शनि ,,	,,	32	शार्ङ्गवैष्णव ,,	,,
16	राहु ,,	,,	33	वैखानस ,,	,,
17	केतु ,,	,,	34	पाञ्चरात्रवैष्णव ,,	,,

35	शेष पूर्वपक्ष	,,	,,	42	कापालिक	,,	,,
36	बराह	पूर्वपक्षसिद्धान्तौ		43	शक्तिगणपति	,,	,,
37	मन्मथ	,,	,,	44	हरिद्रागणपति	,,	,,
38	विष्वक्सेन	पूर्वपक्षः		45	स्वर्णगणपति	,,	,,
39	गरुड पूर्वपक्षः			46	सन्तानगणपति	,,	,,
40	क्षपण सिद्धान्तः			47	नवनीतगणपति	,,	,,
41	बौद्ध	पूर्वपक्षसिद्धान्तौ		48	उच्छिष्टगणपति	,,	,,

49 क्षपणकसिद्धान्तः

Remarks:—The Ms. is in good condition. The other work contained herein is:—

'खण्डिका—सभापद्यम्'

The author criticies all the other systems of thought and establishes the Advaita doctrine. The various systems that he criticises are given under Subject. Some topics are repeated.

॥ अद्वैतमकरन्दः (सटीकः) ॥

7635. ADVAITAMAKARANDAḤ (SAṬĪKAḤ).

Burnell's Catalogue No. 6451. Page 93. Left column. Substance—Paper. Size—10×4½ inches. Sheets—8. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Lakṣmīdhara. Complete. Printed.

Beginning

ग्रन्थारम्भे मङ्गलाय गुरुदेवतानमस्कारं करोति ।

कटाक्षकिरणाचान्तनमन्मोहाब्धये नमः ।

अनन्तानन्दकृष्णाय जगन्मङ्गलमूर्तये ॥

तत्त्वमस्यहंब्रह्मास्मीत्युपनिषत्प्रतिपाद्यं प्रत्यक्ब्रह्मणो-
रैक्यं तर्केणोपपादयति—

॥ मू ॥ अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।
ब्रह्मैवाहमतः सिद्धः सच्चिदानन्दलक्षणम् ॥

अस्मिन् श्लोके इदमनुमानमुक्तम् । प्रत्यगात्मा धर्मी ।
ब्रह्मैवेति साध्यो धर्मः । ब्रह्मणा समानस्वभावत्वे सति
उपाधिपरामर्शाधीनभेदप्रतिभासत्वात् ।

End:

॥ मू ॥ उपशान्तजगज्जीवशिष्याचार्येश्वरभ्रमम् ।
स्वतस्सिद्धमनाद्यन्तं परिपूर्णमहं महः ॥ २७ ॥

ग्रन्थं समाप्य तस्य सज्जनग्राह्यतामाशास्ते ।

लक्ष्मीधरकवेस्सूक्तिशारदाम्भोजसंभृतः ।

अद्वैतमकरन्दोऽयं विद्वद्भृङ्गैर्निपीयताम् ॥

Colophon:

इति श्री लक्ष्मीधरकृतावद्वैतमकरन्दः सम्पूर्णः ।

Subject: Advaitamakaranda a short treatise in support of

Advaita with a very brief ṭīkā, perhaps of the author himself

Remarks:—The Ms is in a fairly good condition. On the title page is given—

हे पुस्तक + काशीदेशाहून + आणिलें अस्सें ।

and a loose verse.

मोहातीतो विशुद्धो मुनिभिरभिहितो मोहसंक्रान्तमूर्तिः

साक्षी स्वान्ते तदुत्थे प्रतिफलितवपुर्गीयतेऽसौ प्रमाता ।

वृत्त्यारूढः प्रमाणं फलमिति धिषणावृत्तिसंव्याप्य चेत्यो(?)

पाधिर्मोहोत्थशब्दप्रमुखविषयगस्यात्प्रमेयः परात्मा ॥

After the colophon is given:—

सदा सदानन्दपदे निमग्नं मनो मनोभावमपाकरोति ।

गतागता या समपास्य सद्यः परा परातीतमुपैति तत्त्वम् ॥ १ ॥

After this some unintelligible yoga matter of 4 lines is written.

This short Advaitic prakaraṇa in 27 Anuṣṭub verses, proving logically the identity of the Jivā and Brahma is by one Lakṣmīdhara, pupil of Anantānandakṛṣṇa. This author seems to have become a Sanyāsin after this work was composed and his name seems to have changed to Kṛṣṇendra as is made out by a Ms. of Advaitamakarandavyākhyā No. 7641.

This work has been printed in the Śrī Vāṇī Vilās Press, Srirangam with the commentary of Svayamprakāśayati. For further remarks see under No. 6930. (Vol. XII.)

॥ अद्वैतमकरन्दः (सटीकः) ॥

7636. ADVAITAMAKARANDAH (SATĪKAH).

P. A. Collection No. 122.

Substance—Paper. Size—8½ × 4⅛ inches. Sheets—9 (6-14). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—Lakṣmīdhara. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7635.

Remarks:—The Ms. is in a good condition.

॥ अद्वैतमकरन्दव्याख्या—रसाभिव्यञ्जिका (समूला) ॥

7637. ADVAITAMAKARANDAVYĀKHYĀ—RASĀBHIVYAÑJIKĀ (SAMŪLĀ).

Burnell's Catalogue No. 9669 Page 98. Left column. Substance—Palm leaf. Size—17 × 1½ inches. Leaves—13. Lines—10 to a Page. Script—Grantha. No. of Granthas—500. Author—Svayamprakāśayati Complete. Printed

Beginning:

नित्यं निरन्तरानन्दं चिद्घनं ब्रह्म निर्भयम् ।
भुत्वा तर्कानुभूतिभ्यां अहमस्म्यद्वयं सदा ॥

अम्बागृहीतवामार्धं वन्दे चन्द्रकलाधरम् ।
लावण्यमधुराकारं कारुण्यरसवारिधिम् ॥

कैवल्यानन्दयोगीन्द्रपादकञ्जरजो रविः ।
राजते मे हृदाकाशे मोहध्वान्तनिवर्तकः ॥

शुद्धानन्दपदाम्भोजमकरन्दानिषेवणात् ।
निर्वाणरसमासाद्य हृष्टाः शिष्यालिपङ्क्तयः ॥

सच्चिदानन्दयोगीन्द्रा जयन्ति भुवि केचन ।
यत्कृपाबलतस्तीर्णो मया संसारवारिधिः ॥

इह खलु लक्ष्मीधरो नाम कश्चित्कवीन्द्रः * * किंचित्प्रकरणमद्वैतमकरन्दाख्यमारभमाणः * * मङ्गलं स्वयमनुष्ठाय शिष्यशिक्षार्थं ग्रन्थतस्स्वयं निबध्नाति ।

कटाक्ष + मूर्तये ॥

End:

यद्यप्यत्र प्रतिश्लोके बहु वक्तव्यमस्ति, तथापि मन्दबुद्धीनां व्युत्पादनार्थं प्रवृत्तेन मया ग्रन्थकाठिन्यभिया गौरवभयात् उपरतमिति ।

(अद्वैतमकरन्दस्य रसाभि)व्यञ्जिका कृता ।
स्वयम्प्रकाशयतिना पुरुषोत्तमशासनात् ॥

ब्रह्मानन्दरसास्वादमिच्छद्भिः विबुधोत्तमैः ।

रसाभिव्यञ्जिका ह्येषा परिशील्या सदाऽदरात् ॥

* *

(इदं श्लोकद्वयं सच्चिदानन्दानां)।

.... ।

मन्दस्मितानन्दितभक्तजालं
सौन्दर्यसन्तर्पितवामभागम् ।
स्वानन्दसन्तृप्तममन्दहासं
साम्बं भजे चन्द्रकलावतंसम् ॥

Colophon:

इति श्री परमहंसपरिव्राजकाचार्य श्रीकैवल्यानन्दयोगीन्द्रपाद-कमलभृङ्गायमाणस्वयंप्रकाशाख्ययतिना विरचिता रसाभिव्यञ्जिकाख्या अद्वैतमकरन्दव्याख्या समाप्ता ॥

Subject: Advaitamakarandavyākhyā; Rasābhivyañjikā.

Remarks :—The Ms. is in a fairly good condition

The author calls himself the desciple of many gurus chief of whom being Kaivalyānandayogīndra and Gopālayogīndra. This author is also the author of many other works chief among them being Haritatvamuktāvalī, Tatvasudhā, Vedāntasangraha, Hastāmalakaślokavyākhyā and Ekaślokīvyākhyā. This commentary along with the text is published in the Srī Vāṇī Vilās Press, Srirangam.

———

॥ अद्वैतमकरन्दव्याख्या—रसाभिव्यञ्जिका (समूला) ॥

7638. ADVAITAMAKARANDAVYĀKHYĀ—RASĀBHIVYAÑJIKĀ (SAMŪLĀ).

Burnell's Catalogue No. 9620. Page 93. Left column. **Substance**—Palm leaf. Size—19½ × 1½ inches. Leaves—9. Lines—10 to a Page Script—Telugu. No. of Granthas—500. Author—Svayamprakāśayati. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7637.

Remarks:—The Ms. is in good condition. There is a loose leaf at the end and one at the beginning, dealing with the same subject.

॥ अद्वैतमकरन्दव्याख्या—रसाभिव्यञ्जिका (समूला) ॥

7639. ADVAITAMAKARANDAVYĀKHYĀ—RASĀBHIVYAÑJIKĀ (SAMŪLĀ).

Burnell's Catalogue No. 9671. Page 93. Left column. Substance—Palm leaf. Size—14¾ × 1¼ inches. Leaves—20. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Svayamprakāśayati. Complete. **Printed.**

Beginning, end, colophon and subject—Same as No. 7637.

Remarks:—The Ms. is in a good condition.

॥ अद्वैतमकरन्दव्याख्या—रसाभिव्यञ्जिका (समूला) ॥

7640. ADVAITAMAKARANDAVYĀKHYĀ—RASĀBHIVYAÑJIKĀ (SAMŪLĀ).

P. A. Collection No. 124.

Substance—Paper. Size—12½ × 5¼ inches. Sheets—25. Lines—8 to a Page Script—Devanāgarī. No. of Granthas—600. Author—Svayamprakāśayati. Complete. Printed.

Beginning, end, colophon and subject—Same as No. 7637.

Remarks:—The Ms. is in a fairly good condition.

After the colophon is given:—

इदं पुस्तकं रङ्गस्वामिस्वहस्तालिखितम् ॥

॥ अद्वैतमकरन्दव्याख्या ॥

7641. ADVAITAMAKARANDAVYĀKHYĀ.

Burnell's Catalogue No. 9811 a. Page 94. Right column.

Substance—Palm leaf. Size—18½ × 1½ inches. Leaf—1. Lines—15 to a Page. Script—Telugu. No. of Granthas—120. Author—Svayamprakāśayati. Incomplete. Fragment only. Printed.

Beginning

ओं ॥ नित्यं निरन्तरानन्दं चिद्घनं ब्रह्म निर्भयम् ।
स्मृत्वा तर्कानुभूतिभ्यामहमस्म्यद्वयं सदा ॥

अम्बागृहीतवामार्धं वन्दे चन्द्रकलाधरम् ।
लावण्यमधुराकारं कारुण्यरसवारिधिम् ॥

बोधज्ञानेन्द्रयोगीन्द्रपदकञ्जरजो रविः ।
राजते मे हृदाकाशे मोहध्वान्तनिवर्तकः ॥

गीर्वाणेन्द्रपदाम्भोजद्वन्द्वं सेवे यदुद्भवम् ।
निर्वाणरसमासाद्य हृष्टा शिष्टालिपङ्क्तयः ॥

नारायणेन्द्रयोगीन्द्रा जायन्ते भुवि केचन ।
यत्कृपाबलतस्तीर्णो मया संसारवारिधिः ॥

इह खलु कृष्णेन्द्रो नाम कश्चिद्यतीन्द्रो +
कश्चित्प्रकरणमद्वैतमकरन्दाख्यं आरभमाणः * *
मङ्गलं * ग्रन्थतो निबध्नाति ।

* *

End:

शाश्वत इति । अतस्त्रिविधनाशाभावात् नित्यवदा-
त्मेति तस्य ब्रह्मणाभेदस्सम्यक्....दत इति भावः । हेतुः
संयोगादात्मनो न नाश इति द्वितीयपद्यं प्रपञ्चयति ।....
............।

Colophon: Nil.

Subject: Advaitamakarandavyākhyā.

